Shri Raghunatha Temple MSS. Library,
JAMMU

No. ६६८ · घ

Title शनिस्तोत्रम्

Author दशरथः

Extent २ Age

Subject स्तोत्रम् · सम्पूर्णम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ६६८-घ

प्रति स्तोत्र म् (स्तोत्रम्)

पत्राणि ८ (सम्पूर्णम्)

नं० ५५८-घ

कर्त्ता दशरथः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सं० ११-८ [illegible]
शनिस्तोत्र
२४ [illegible]
स्तोत्र [illegible]
[illegible] - दशा [illegible]

॥ अथ शनिस्तोत्रप्रारंभः ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श॰स्तो॰
१

॥श्रीगणेशायनमः॥ द्विद्वादशाष्टजन्मस्थे शनौ सर्वग्रहेश्वरे॥
किंकर्तव्यं नरैर्नाथ विधानं क्लेशशांतकं॥१॥ शिवउवाच॥ रघु
वंशेति विख्यातो राजा दशरथः पुरा॥ चक्रवर्ती महाप्राज्ञः सप्त
द्वीपाधिपः कृती॥२॥ कृत्तिकांते शनिं ज्ञात्वा दैवज्ञैर्ज्ञापितो हि सः॥
रोहिणीं भेदयित्वा तु शनिर्यास्यति सांप्रतं॥३॥ शाकटं भेदइत्युक्तः
सुरासुरभयप्रदः॥ द्वादशाब्दं तु दुर्भिक्षं भविष्यति सुदारुणं॥४॥
एतच्छ्रुत्वा ततो वाक्यं मंत्रिभिः सहपार्थिवः॥ चिंतयामास किमि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

दं भयंकरमुपस्थितं ॥५॥ देवाश्च नगरग्रामा भयभीताः समंततः
अब्रुवन्सर्वतो लोका भयमेतदुपस्थितं ॥६॥ आकुलं तु जगदृष्ट्वा
पौरजानपदादिकं ॥ पप्रच्छ प्रयतो राजा वसिष्ठप्रमुखान्द्विजा
न् ॥७॥ दशरथ उवाच ॥ समाधानं किमत्रास्ति ब्रूत मां द्विजसत्त
म ॥ वसिष्ठ उवाच ॥ प्राजापत्ये तु नक्षत्रे तस्मिन् भिन्ने कुतः प्रजाः ॥
८॥ योगश्चायमसाध्यो हि ब्रह्मशक्रादिभिः सुरैः ॥ इत्याकर्ण्य वच
स्तस्य मुनिमुख्यस्य भूमिपः ॥९॥ संचिंत्य चेतसि तदा साहसं स

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मुपस्थितं ॥ रथमारुह्य वेगेन गतो नक्षत्रमंडलं ॥१०॥ योजनानां सपा
दस्य लक्षस्योपरि सूर्यजः ॥ रोहिणीपृष्ठमास्थाय राजा दशरथस्तदा
॥११॥ रथे तु कांचने दिव्ये मणिरत्नविभूषिते ॥ हंसवर्णैर्हयैर्युक्ते म
हाकेतुसमुच्छ्रिते ॥१२॥ दीव्यमानो महारत्नैः किरीटमुकुटोज्ज्व
लैः ॥ व्यभ्राजत तदाकाशे द्वितीय इव भास्करः ॥१३॥ आकृष्य चा
पमाकर्णं संहारास्त्रं च योजयेत् ॥ कृत्तिकांते शनिं ज्ञात्वा प्रविशंतं
तु रोहिणीं ॥१४॥ दृष्ट्वा दशरथश्चाग्रे तस्थौ सुभ्रुकुटीमुखः ॥ सं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

हराख्यं शनिर्दृष्ट्वा सुरासुरभयंकरं ।।१५।। हस्तिस्वान्तपतिं शौरीरिदं
वचनमब्रवीत् ।। शनिरुवाच ।। पौरुषं तव राजेंद्र परं दृष्टं भयंकरं ।।१६।।
देवासुरमनुष्याश्च विद्याधरमहोरगाः ।। मयावलोकिताः स
र्वे नाशं यांति न संशयः ।।१७।। तुष्टोऽहं तव राजेंद्र तपसा पौरुषेण च
वरं ब्रूहि प्रदास्यामि मनसा यदभीप्सितं ।।१८।। सर्वाभीष्टं प्रदास्या
मि नात्र कार्या विचारणा ।। शनेर्वचनमाकर्ण्य राजा दशरथोऽब्रवी
त् ।।१९।। दशरथ उवाच ।। प्रसन्नो यदि मे शौरे वरमेकं महे वरो ।।

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रोहिणीं भेदयित्वा तु नगंतव्यं त्वया ज्ञाने: ॥२०॥ सरित: सागरा: सर्वे
यावचंद्रार्कमेदिनी ॥ यावित्तं तु मया त्रोरिनास्य भिक्षामि ते वरं ॥
॥२१॥ एवं श्रुत्वा ज्ञानिस्तस्मै वरं प्रादात्तु ज्ञाश्वतं ॥ एवं हि भविता
राजन्य देत प्रार्थितं त्वया ॥२२॥ द्वादशाब्दं तु दुर्भिक्षं कदाचि
न्न भविष्यति ॥ प्राप्य चैवं वरं राजा कृतकृत्योभवत्तदा ॥२३॥
एवं वरं तु संप्राप्य हृष्टरोमा स पार्थिव: ॥ रथोपरि धनुर्धृत्वा
भूत्वा चैव कृतांजलि: ॥२४॥ ध्यात्वा सरस्वतीं देवीं गणनाथं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

विनायकं ॥ राजा दशरथस्तोत्रं शौरेरिदमथाकरोत् ॥२५॥

ॐ अस्य श्रीशनिस्तोत्रस्य ॥ वशिष्ठ ऋषिः ॥ अनुष्टुप् छंदः

शनैश्चरो देवता ॥ सर्वोपद्रवशांतये पाठे विनियोगः ॥ ॐ न

मः कृष्णाय नीलाय नीलकंठनिभाय च ॥ नमो नीलमयूखा

य नीलोत्पलनिभाय च ॥१॥ नमस्ते कोटराक्षाय दुर्निरीक्षाय

ते नमः ॥ नमः पुरुषगात्राय स्थूलरोमाय च ते नमः ॥२॥ नमो नि

त्यं क्षुधार्ताय अतृप्ताय च ते नमः ॥ नमः कालाग्निरुद्राय कृतां

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तायनमोनमः॥३॥नमस्तेघोररूपाय भीषणाय करालिने॥नमस्तेस
र्वभक्षाय वलिमुख नमोस्तुते॥४॥सूर्यपुत्र नमस्तुभ्यं भास्कराभयदा
य च॥नमो दीर्घाय शुष्काय कोटर दृष्टे नमोस्तुते॥५॥अधोदृष्टेन
मस्तुभ्यं संवर्तक नमोस्तुते॥नमो मंदगते तुभ्यं पिंगलाक्षाय ते न
मः॥६॥तपसा दग्धदेहाय नित्यं योगरताय च॥ज्ञानचक्षुर्नमस्तु
भ्यं कोटराक्षाय नमोनमः॥७॥निस्त्रिंशाय नमस्तुभ्यं कश्यपा
त्मजसूनवे॥नमो वारुणरौद्राय कालदंष्ट्राय वै नमः॥८॥छाया

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

मात्रे नमस्तुभ्यं त्राणमवर्णायते नमः ॥ तुष्टो राज्यप्रदस्त्वं हि क्रुद्धो
राज्यापहारकः ॥९॥ देवासुरमनुष्याश्च सिद्धविद्याधरो
रगाः ॥ त्वयावलोकिताः सर्वे दैन्यमाशु व्रजंति हि ॥१०॥ ब्रह्मा
शक्रो मुनिर्व्यासऋषयः सप्ततारकाः ॥ स्थानभ्रष्टां पतंतीह
त्वया दृष्ट्यावलोकिताः ॥११॥ देशाश्च नगरग्रामा द्वीपाश्चैव
वनद्रुमाः ॥ रौद्रदृष्ट्या त्वया दृष्ट्या नाशं यांति समूलतः ॥१२॥
प्रसादं कुरु मे सौरे वरार्थे ते मतः स्थितः ॥ एवं स्तुतस्तदा सौ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

रीराजा दशरथेन सः ॥१३॥ तमब्रवीच्छनिर्वाक्यं हृष्टरोमा च भा
स्करिः ॥ शनिरुवाच ॥ तुष्टोऽहं तव राजेंद्र तपसा विक्रमेण च ॥
१४॥ वरं ब्रूहि प्रदास्यामि यत्ते मनसि वर्त्तते ॥ दशरथ उवाच ॥
प्रसन्नो यदि मे सौरे वरं ब्रूहि ममेप्सितं ॥१५॥ अद्य प्रभृति भू
तानां पीडा कार्या न कर्हिचित् ॥ देवासुरमनुष्याणां गंधर्वोर
गराक्षसां ॥१६॥ सर्वेषामेव लोकानां क्षेमदो भव भास्कर ॥ श
निरुवाच ॥ पीडा नातः परं लोके मत्कृता सं भविष्यति ॥१७॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अदेयं च वरं गुह्यं यत्त्विदं प्रवदामि ते ॥ त्वया प्रोक्तमिदं स्तोत्रं ये पठि
ष्यंति मानवाः ॥१८॥ एककालं द्विकालं वा तेभ्यः श्रेयो ददाम्यहं ॥
देवासुरमनुष्याणां यक्षगंधर्वराक्षसां ॥१९॥ मृत्युस्थानगतो वा
पि जन्मद्विद्वादशोपि वा ॥ पुरुषो वा स्त्रियो वापि मद्भयेन प्र
पीडिताः ॥२०॥ न तेषां जायते पीडा ये मां स्तोष्यन्ति भक्तितः
॥ यः पुनः श्रद्धयायुक्तः शुचिस्नात्वा समाहितः ॥२१॥ शमी
पत्रैः समभ्यर्च्य प्रतिमां लोहितां मम ॥ चतुर्भुजां त्वां रवप

द्यां किरीटांगदधारिणीं ॥२२॥ वरदान धनुः शूल वाणां कितकरां
शुभां ॥ तैलेवा तिलैरग्नौ वा यद्विस्थाप्य यथा विधिं ॥२३॥ मद्दि
नेतु विद्वौरण स्तोत्रेणानेन पूजयेत् ॥ पूजयित्वा जपेन्मंत्रं वैदिकं
वाप्य तांत्रिकं ॥२४॥ अष्टोत्तरसहस्रं तु शतं वा प्रीतये मम ॥ कृतां
जलिपुटो भूत्वा इदं स्तोत्रमुदीरयेत् ॥२५॥ संपूजयेत्ततो मंत्रैः कु
ंकुमादिविलेपनैः ॥ नीलाब्जकुसुमतुलसीशमीपत्रादिभिः शु
भैः ॥२६॥ माषौदनं तिलैर्मिश्रं दद्याल्लोहं च दक्षिणां ॥ कृष्णां गां

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वृषभं वापि दद्याद्विप्राय महिने ॥२७॥ अथवा महिषीं कृष्णां कृ
ष्णवस्त्रावृतां शुभां ॥ कांस्योपदोहनां राजन्नुविनीतां तु पयस्वि
नीं ॥२८॥ कुटुंबिने ब्राह्मणाय दद्यान्मस्रीतयेन्वय ॥ तस्यपी
डां न चैवाहं करिष्यामि कदाचन ॥२९॥ गोचरे जन्मलग्ने वाद
शास्तं तद्दशासु च ॥ नवांतिसततं पीडामन्यग्रहकृतामपि ॥
३०॥ अनेनैव विधानेन पीडामुक्तं जगद्भवेत् ॥ शिवउवाच ॥
एतेन कृतार्थमात्मा वरद्वयं तु संप्राप्य राजा दशरथस्तदा ॥३१॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं नमस्कलत्रानैश्वर्यं ।। त्रानैश्वर्यराज्यनुज्ञानारथमारूह्य वीर्य
वान् ।। ३२ ।। स्वस्थानं गतवानूत्र जा पूज्यमानो महेश्वरः ।। यइदं
प्रातरुत्थाय त्रौणरवारे स्तवं पठेन् ।। ३३ ।। स नो त्राणनिकृतां पीडां
प्राप्नोति भुविमानवः ।। पूजयित्वा त्राणिं वापि तस्य तुष्यति भा
स्करिः ।। ३४ ।। पठ्यमानमिदं स्तोत्रं श्रद्धयाचश्रृणोति यः ।।
सर्वाभीष्टेन संयुक्तः पुत्रपौत्रसमन्वितः ।। ३५ ।। चिरंजीवीन
रोलोके भविष्यति न संत्राय ।। यइदं प्रातरुत्थाय त्रौणरवारे

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

सदा यः पठेत् ॥३८॥ तस्याभीष्टप्रदो मंदो भवत्येव न संशयः ॥२
॥ कोणस्थः पिंगलो बभ्रुः कृष्णो रौद्रोंतको यमः ॥ शौरिः शनैश्च
रो मंदः पिंगलादेन संस्तुतः ॥१॥ एतानि शनि नामानि प्रातरु
त्थाय यः पठेत् ॥ शनैश्चरकृतां पीडां न प्राप्नोति कदाचन ॥२॥
॥ इति दशरथकृत शनिस्तोत्रं संपूर्णम् ॥ ॥ शुभम् ॥ ॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नं० ६६८-घ

ज्ञा. स्तो.

८

४

॥ इति विश्वरस्तोत्रं संपूर्णं ॥ (स्तोत्रम्)

पत्राणि - ८ (सम्पूर्णम्)

कर्ता दशरथः

८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative